अद्रिपाती । अद्रिसम्बन्धि यः पृथुबाष्पः तत् दृष्ट्वा तत् ज्ञानेन आश्रयाशमनुमिनोतीति तदर्थाभिप्रायेण अत्र युक्तम् इत्युक्तम् ।

धूमाळिरास्ते हि यतस्समीपे सुश्रोणि रोमाळ्यपदेशतस्तत् ।
तनून पातस्थलमेष पुंसो वक्षोरुहाद्रिस्तव पक्ष आसीत् ।। 211 ।।

धूमेति । पर्वतसमीपे धूमदर्शने सति तेन वह्नि अनुमितौ पर्वतस्य पक्षत्वं युक्तमेव इत्याह । तव वक्षोरुहाद्रेस्समीपे रोमाळयपदेशेन धूमाळिः आस्ते स चाद्रिः तनूजपातः अग्नेस्थलम् आश्रयः तन्वादौ नः तनूनः मन्मथः । तस्य पातस्थलं यथा कुत्रचित् स्थले दृढपतने ततः तस्मात् गळन्न शक्यते तत्वत् मन्मथस्य सर्वदा निवासस्थलमित्यर्थः । तस्मात् पक्ष आसीत् । अनुमिति पक्ष आसीत् । अस्मत् प्रीति विषयश्च आसीदित्यर्थः ।

अप्रत्यक्षं तावकं तन्वि मध्यं तस्मान्मिथ्याभूतमेतत् हि नूनम् ।
विश्वं मिथ्या दृश्यतारूप हेतो : इत्यद्वैती यत् प्रयुङ्क्ते कथन्तत् ।। 212 ।।

अप्रत्यक्ष इति । तव मध्यं मिथ्याभूतं - शून्यं, तस्मात् अप्रत्यक्षम् - अदृष्यं भवति । अदृष्यत्वात् मिथ्याभूतम् इत्यर्थः । एवं स्थिते विमतं मिथ्या दृष्यत्वात् इति दृश्यत्व हेतुना अद्वैतिनः प्रपञ्चमिथ्यात्वानुमानं कथम् इत्यर्थः ।

भक्त्या ध्यायति यस्तमोपहमलं सत्वावहं केशवं तस्य स्यात् परदेवात्मक महा पुन्निश्चयो चञ्चलः ।
रुद्रं ध्यायतिचेत् तमोगुणनिधिं नस्यादसौ निश्चयो
युक्तं पुरुषनिश्चयो नहि भवेत् स्थाणोः परामर्शतः ।। 213 ।।

भक्तेति । शुद्धभावंगतो भक्त्या शास्त्रात् वेदि जनार्दनम् इति सञ्चयवचनात् भगवत् भक्तिरेव सम्यक् शास्त्र जन्य ज्ञानकारणं तेनैव परदेवता पारमार्थ्य निश्चयः रुद्रध्यानात् तन्निश्चयो न भवेत् । जायमानं हि पुरुषं यं पश्येत् मधुसूदनः सात्विकः स तु विज्ञेयः स वै मोक्षार्थचिन्तकः । जायमानं हि पुरुषं ब्रह्मा रुद्रोऽथवा पुनः रजसा तमसा चैव मानसं समभिप्लुतम् इत्यादि प्रमाणत् । तस्मात् विष्णुध्यानात् एव महापुरुष निश्चयो भवति ननु रुद्रध्यानात् इति भावः । इममेवार्थं चातुर्याद्युक्त्यन्तेरेण दृढयति युक्तम् इत्यादिना । स्थाणुर्वा पुरुषोवा इति संशयेपुरुषत्व व्याप्यकरादिमानिति परामर्शात् पुरुष निश्चयो भवति । स्थाणुत्व व्याप्य-वक्र कोटरादिमानिति परामर्शात् स्याणुत्व निश्चयो भवति । स्थाणु परामर्शात् पुरुषनिश्चयो न भवत्येवेति सर्वमतसिद्धोर्थः तदर्थाभिप्रायेण आह स्थाणोः परामर्शात् पुरुषनिश्चयो न भवेदिति । स्थाणोः रुद्रस्य शुष्कवृक्षस्य च ।

यस्मिन्नास्ते कार्यसिद्धिः स भक्तेष्वत्यासक्त्या साधनेच्छापि यत्र ।
सो भूत् कृष्णः पाण्डवानां हि पक्ष साधूनां तत्पक्ष भावो न चित्रम् ।। 214 ।।

यस्मिन्निति । यस्मिन् कृष्णे कार्यसिद्धिः वर्तते भक्ताभिप्रेतकार्य साधनेच्छापि तत्र वर्तते । सिषाधयिषा

विशिष्ट कार्यसिद्धि सत्वात् स कृष्णः पाण्डवानां पक्षोभूत् इत्यर्थः । साधूनां सात्विकानां तत्पक्षभावः - कृष्ण पक्षभावः न चित्रं नाश्चर्यम् । तार्किकै सिषाधयिषा विरह विशिष्ट सिध्यभावः पक्षतेति पक्षतालक्षणमुच्यते । तदर्थाप्यत्राभिप्रेतः । साधूनां - शास्त्रज्ञानाम् । तत्पक्षभावः सिषाधयिषा विरह विशष्ट सिद्धभावरूप पक्षत्वं न चित्रं युक्तमित्यर्थः ।

सुव्याप्त तत् गैरिक मुख्य हेतु निर्धारितात्पेतर चित्रभानोः ।
पङ्क्तेर्गिरीणां सुमनो वरस्स सपक्षतान् चित्रमखण्डयत्ताम् ॥ 215 ॥

सुव्याप्तेति । सुक्ष्याप्ता - सम्यक् व्याप्ताः तथा विधाञ्च से गैरिकाः धातवः त एव मुख्य हेतवः तैः निर्धारिताः निश्चिताः । अल्पेतराः चित्रश्च भानवः दीधितयः यस्यां तस्याः गिरीणां पक्षेत्यर्थः । अधिकैः गैरिकधातुभिः विचित्र कान्तिमतः । पर्वत [illegible]र्थः । तां सपक्षतां - तथाविधं पक्ष (पत्र) वैशिष्ट्यं सुमनोवरः देवेन्द्र अखण्डयत् । पक्षच्छेदं चकार इत्यर्थः । अर्थान्तरन्तु इदमरण्यं वनह्निमत् कुतः धूमात् यो धूमवान् स वह्निमान् यथापूर्वं मया दृष्टाः पर्वताः तस्मादिदं वह्निमत् इत्यवयव मूलानुमतिः जायते । तत्र सन्दिग्ध साध्यवतोरण्यस्यपक्षत्वं निश्चित साध्यवतां पर्वतानां सपक्षत्वञ्च सर्वैः पण्डितैः अङ्गीक्रियते । तदिदमुच्यते । सुव्याप्तेति । अव्यभिचरित व्याप्ति विशिष्ट तत् गिरिनिष्टः यो मुख्य हेतुः धूम इत्यर्थः । तेन निर्धारितः निश्चितः अल्पेतर चित्रभानुः भूयिष्टा निर्यस्यां गिरिपदेतः सुमनोवरः शास्त्रज्ञश्रेष्टः सपक्ष **** खण्डयदित्युक्तं तत् चित्रम् इत्यर्थः ।

कलयति बहुकंपं वृष्टि कालेषु को वा विलसति कचभारः कीदृशो येषितां हि ।
रघुपति सुखमैच्छत् व्याधराजोऽपि कस्मात् कथय शिशिरवायुः गन्धवान् स्नेहवत्वात् ॥ 216 ॥

कलयतीति । प्रश्नत्रयस्यापि, शिशिरवायुः गन्धवान् स्नेहात् इति क्रमेणोत्तरत्रयं बोध्यम् । वायुः गन्धवान् स्नेहत्वात् इत्यत्र हेतोः व्यभिचारविरोधा सिद्धिपाध सत्प्रतिपक्षरुपयन् च हेत्वाभासरूप दोषदुष्टत्वात् तत्प्रयोगस्यासाधुत्वं न्यायशास्त्रोक्तम् । तत् प्रयोगस्य प्रकारान्तरेण साधुन्वार्थं चातुर्यात् एवं प्रेरितम । अस्य श्लोकस्य अन्तर्लापि बहुर्लापि प्रकरणे वक्तव्यत्वेपि अस्य वाक्यप्रयोगस्य त्याज्यत्वेनापि शास्त्रोक्तत्वात् अत्रोक्तिरिति बोध्यम् ।

त्वद्दर्शनाशा मम पार्थिवाभूत् आशा परं मेहृदि सुप्रतिष्ठा ।
तत् सिद्धिरद्यापि न मे बभूव हृदाश्रयाशस्य कथं हि सिद्धिः ॥ 217 ॥

त्वदिति । राजदर्शनाभावात् विषण्णः कश्चन कवि राज्ञे लिखति इमं श्लोकम् । हृत्चित्तं - आश्रयः आशा यस्य सर्वदा मनोरथ पूरितहृदयस्येत्यर्थः । कथम् अभीष्टसिद्धिः - त्वदीय दयैव मदभीष्टं सिद्धयेत् न तु मन्मनोरथमात्रत् इति भावः । हृदयाश्रयस्य हृतं संबन्धि वह्नेः कथं शिद्धि । अतः हृदो वह्निमानिति प्रयोगि हेतोः माधितत्वं शास्त्रोक्तमिति च भावः । ?



गन्तासि किंनाथ मया विना त्वय्यत्यन्त संयोगधियां हि सत्याम् ।
कथं त्वदध्वानमहं द्वितीया न प्राप्नुयान्नार्हसि मां विमोक्तुम् ॥ 218 ॥

त्वं प्रोषितो नाथ सुखेन तिष्टन् नद्यापि नागच्छसि बाधते माम् ।
मन्युस्तु वैयाकरणाः कथं वा स्त्रीपुंस साधारणमाहरेतम् ॥ 219 ॥

दृष्टादहं कुतिरभूदधिका महान्तं सा प्राप चेद्यतिलयं भजते हि तस्मात् ।
उक्तिह्यहंकृतिलयो महतीति युक्तं यत् कारणे लयवचस्तदसत्यमेव ॥ 220 ॥

कल्पस्य भाग्यवशतो यदि चार्थलाभः स्याद्राजराजमधमं मनुतेन्यता चेत् ।
दैन्यं भजत्युभयताऽपि महान् न तादृक् उक्तं महान् प्रकृतिमेति निजां तटस्थाम् ॥ 221 ॥
कल्प इति । महान् धीरोदत्तः उभयतापि अर्थलाभालाभयोः तादृक् न । गर्वदैन्यभाक् न भवति । तत् युक्तं - निजां सवासाधारणां तटस्थामेव प्रकृतिं निर्विकार चित्तत्वमेव महान् यस्मादेति तस्मात् इत्यर्थः । शास्त्रार्थस्तु महान् महत् तत्वं प्रकृतिमेति । लयकाले स्वकारणभूतां प्रकृतिमेति इति युक्तमेवेति ।

अवमन्येत चेदन्यं परिहास्य स्वयं भवेत् ।
वृद्धाद्याधः कृते रूक्षाप्यदन्तत्वं भजत्यहो ॥ 222 ॥
अव इति । अन्यं - अङ्गविकलमित्यर्थः । उक्षा-वृषभः वृद्धाद्यधः कृते - दन्तशून्यत्वात् अङ्गवैकल्य - विशिष्ट वृद्धादि परिहासकारणात् - स्वयमपि अदन्तत्वं भजति । अत् परिहासो भवति इति भावः । कः उक्षाकान् वृद्धाधिकान् अधः कृत्वो अ द दन्तो भवति इत्याकाङ्क्षायां । अत्र व्याकरण शास्त्रार्थः । उक्षा-उक्षन् शब्दः नकारान्तः वृद्धमहदाद्यतः कृते तत्पूर्वकत्वे सति इत्यर्थः - अदन्तत्वं - अकारान्तत्वं भवतीति अर्थः । वृद्धश्चासौ उक्षा च वृद्धोक्षः महांश्च उक्षाच महोक्ष इति ।

मां दुष्ट्वा फलमाख्याहि मौहूर्तिक न जातकम् ।
एकादश गुरुत्वात् स्यात् बाले सर्वत्र ते जयः ॥ 223 ॥
मां इति । काचन स्त्री ज्यातिष्कं पृच्छतिब मौहूर्तिक ! मम जातकं नास्ति । मां दृष्ट्वा 'फलं वद' इति । सोऽति चातुर्यात् उत्तरयति हे बाले त्वाम् अपश्यम् । तव एकादशगुरूत्वात् एकादशस्थाने गुरोस्थित्या सर्वत्र जयो भवेत् इत्यर्थः । लग्नात् एकादश स्थाने बृहस्पति सत्व शुभ फलमिति मौहूर्तकाः । एकादश शब्देन लक्षितलक्षणया राश्येकादशकाव बोधद्वारा तत् सदृशौ स्तनं उच्ये । तव स्तनयोः बुहत्वात् त्वं सर्वमोहकरीति भावः ।

मत्तो लब्ध धना त्वं मां मा मुञ्च गणिके जड ।
पुनर्वसुस्थितिर्यावत् तावन्मिथुन शालिता ॥ 224 ॥

मत्तेति । काचन वेश्या स्वसंभोगार्थमागतः कामुको-धन हस्तश्चेत् तेन सह रमते । नो चेत् उपेक्षते । तस्यै धनमप्यदत्वा रिक्तहस्तः कश्चित् विटः तां प्रत्याह । साऽपि स्वाभिप्रायानुगुणमेव उत्तरमाह - हे जड ! मिथुनशालिता मत्संभोगः पुनः पुनरपि यावत् ! धनं अस्ति तव हस्ते - धनं यावत् तावत् एवेत्यर्थः । पुनर्वसु त्रिपादपर्यन्तस्येव मिथुनराशित्वेन यावत् पुनर्वसुनक्षत्रं तावदेव मिथुनराशि सत्वमित्यर्थः ।

नक्रेल्पेपि गुरूर्हस्ती दुर्बलो भवदत्भुतम् ।
नक्रावाप्तिर्गुरोस्याच्चेत् तद् दौर्बल्ये किमत्भुतम् ॥ 225 ॥

नक्रेति । हस्ती-गजेन्द्रः । उत्तरार्धेन तत् न अद्भुतपित्यर्थः । तरकल्पनेनाह । गुरोः बृहस्पतेः नक्रावाप्तिः मकरराशिप्राप्तिः तस्य तद्राशिः नीचस्थानमिति ज्योषशास्त्रम् । ?

मयि रक्तस्सखि प्रेयान् प्रणयात् मदुपेक्षितः
प्रापावस्थां तुरीयान्तत् स्थितिरद्य हि कीदृशी ।
रक्तः प्राप्त तुरीयश्चेत् तेन ते किं फलं भवेत् ॥ 226 ॥

मयीति । तुरीयामवस्थां - मूच्छर्यां विरह वेदनातिशयात् इति भावः । तत् स्थितिः कीदृशीति काचन कलहान्तरिता । सखी पृच्छति - रक्त इत्यर्थेन सखी वचनमाह । रक्तः रागविशिष्टोऽपि प्राप्त तुरीयश्चेत् मूर्च्छां प्राप्तः चेत् - तेन तव किं फलम् । न किमितीत्यर्थः । रक्तः अङ्गारकः प्राप्ततुरीयश्चेत् कर्कटराशेः तस्य नीचस्थानत्वेन तेन किं फलमित्यर्थः ।

कान्त त्वं रसिकः प्रौढ नारीमन्यां किमेष्यसि ।
त्वद्योगादेव कन्ये मे बुधस्यापि हि तुङ्गता ॥ 227 ॥

कान्तेति । हे कान्त ! त्वं रसिकः रसज्ञः । मां मुग्धां विहाय अन्यां प्रौढनारीं प्राप्यसि किम्? स आह मुग्धे ! बुधस्यापि - पण्डितस्यापि मम त्वद्योगोदेव तुङ्गता - श्रेष्ठयं, न तु प्रौढनारीयोगादित्यर्थः । बुधस्य कन्याराशि उच्चस्थानत्वात् तद्योगोदेव श्रेष्ठचमित्यर्थान्तरम् ।

शूरस्य पङ्क्तिवदनः परिशोभिहस्तः प्रीत्याऽतुलस्समरभूमिमवाप युक्तम् ।
दृष्ट्वैव दाशरथिमस्य भयाद्य दुच्चहस्तादरेऽपि धनुषश्च्यवनं तु चित्रम् ॥ 228 ॥

शूरेति । श्लोकार्थः स्पष्टः । अर्थान्तन्तु - परिशोभि हस्तः - हस्ताख्यनक्षत्रवान्, अतुल इति युक्तं - अप्राप्त तुलाराशिरित्युचितम् । तन्नक्षत्रस्य कन्याराशिकत्वमिति भावः । उच्च हस्तादरेऽपि - हस्ताख्यनक्षत्रस्य उच्चत्वेऽपि धनुषश्च्यवनं - धनुर्लग्न पिगमस्तु चित्रं - तदुच्च समये धनुर्लग्न सत्वादिति भावः । ?

रजतगिरिनिवास स्वर्णदीप्तं शिरस्ते तदपिशिव कथं त्वं निष्पटो यासि भिक्षुः ।
अपगतमहहार्द्रातारकस्त्वं हि जाता तव गुरूवृषभत्वादीदृशी दुष्टबाधा ।। 229 ।।

रजत इति । ते शिरः स्वर्णेन दीप्तं - स्वर्णदीप्तं । स्वर्णदी - गंगा प्रायं जटायां यस्य तत् इति च । 'अथ त्रिषु जटायां पूरणे प्रास्त्री इति' नानार्थमाला । त्वम् आद्रतारकः - तदाख्यनक्षत्रवानिति । जाता । ? गुरूवृषभत्वात् - वृषभराशौ बृहस्पति सत्वात् तव दुष्टबाधा तव मिथुन राशिकत्वादपेक्षया वृषभस्य द्वादशत्वेन - द्वादशाष्टमे जन्मस्य * * * * * * * निरंगारको गुरूः करोति पीडां इत्यादि ज्योतिषवचनादिति भावः । गुरूः महावृषभः । वाह वृषभ यस्य तत्वादि च ।

विद्वाद्भर्घनपाठिनः प्रबलता या प्रोच्यते सोचिता (?)
तस्माद्यच्च जटाधिकारिपुरुषस्याल्पत्वमुक्तं क्षमम् ।
यस्मादेति ननूच्यतां स धनपाठीनाश्रयश्चेत् कविः
जातोल्पस्स जटावदाश्रयतया चन्द्रः कलावानपि ।। 230 ।।

विद्वद्भिरिति । छान्दसेषु क्रमपाठक जटावल्लभ घनपाठीषु उक्तरोक्तरं श्रैष्ठयं सर्वसिद्धम् । अल्पसादल्पत्वं महत्सात् महत्वञ्च जायत इत्यपि सर्वप्रसिद्धम् । अतः जटावदाश्रयतया-जटावल्लभसम्बन्धात् कलावानपि चन्द्रः अल्पो भवत् । कविः - विद्वान् घनपाठीनाश्रयश्चेत् - घनपाठिश्रेष्ठसङ्गतस्चेत्, उच्चतां - विद्वत् श्रैष्ठयं याति इति भावः । जटावदाश्रयतया - रुद्रसम्बन्धात् पाठीन शब्देन मीन राशिरूच्यते । सः आश्रयः यस्य सः । शुक्रस्य मीनराशिः उच्चस्थानमिति तु हृदयम् ।

व्यापकेनापि संसर्गं छान्दसेन नचारेत् ।
घनपाठीनसंसर्गात् बुधो नीचत्वमेति हि ।। 231 ।।

व्यापीति । बुधस्य मीनराशिः नीचस्थानमिति अवधेयम् ।

न कृषौ न च शास्त्रेर्त्थो वाणिज्यन्तु समाचर ।
तुलासंसर्गमात्रेण मन्दोप्युच्चत्वमेति हि ।। 232 ।।

नेति । वाणिज्यं - वैश्यवृत्तिं । तुलासंसर्गः घटाग्रहणं, तुलाराशि सम्बन्धश्च । मन्दः जडः शनिश्च, तस्य तुलाराशिः उच्चस्थानमिति अर्थः ।

विद्वांसमेत्यैव महान् सपर्यां लभेत मन्दस्तु समेत्य नैच्यम् ।
कलावतस्थानंदतो महत्वं यातो गुरुर्मन्दगृहे हि नीचः ।। 233 ।। (गतो ?)

विद्वांसमिति । अर्थान्तरे, कलावतस्थानं कटकराशिः तस्य गुरूच्चस्थानत्वात् । मन्दगृहं कटकराशि (कन्याराशिः) तस्य तन्नीचस्थानत्वात् ।

वस्तुस्थितिः निर्हेतुस्यात् पुंसां पुण्यं यशस्करम् । (नहेतुस्स्यात्)
सूर्याह्वयत्वमभजत् काव्यद्वेषेऽपि भानुमान् ।। 234 ।।

वस्त्विति । भानुमान् सूर्यः काव्यद्वेषेऽपि व्युत्पादक काव्यज्ञानाभावेऽपि, सूरिः विद्वानिति अह्वयो यस्य तत् भावमित्यर्थः ।

अव्युत्पन्न इति प्रसिद्धमभजत् सूर्यस्तथाप्यस्य चेत्
सहित्ये तु तिरस्कृतस्वककळो जातः कलावानपि ।
मूढावेवबभूवतुः कविगुरू किञ्चायमत्यद्भूतं
ह्यप्याख्योप्यरुणाधिकार किरणावल्योरिति ख्यातिमान् ।। 235 ।।

अविति । अव्युत्पन्नः व्युत्पत्तिशून्यः अस्य सूर्यस्य सहित्ये-सहित्यविषये, कलावान् - विद्वान् । तिरस्कृत स्वककळः - धिक्कृत स्वसाहित्य ज्ञानः जातः - ज्ञानेनेतिभावः । किञ्च * * * * * * * * विनापीत्यर्थः ।

## एकोनविंशप्रकरणं - अन्यापदेशः

माकन्दे पिक वायसैस्सह भवानास्ते कठोरं रट-
न्त्येते मे समयो न चायमिति किं तूष्णीं भवान् तिष्ठति ।
लोकोयं तव भावमेवमविदन्नज्ञोथवा मूक इत्-
येवावैति ततो स्युदञ्चयशनैः त्वं च स्वरं पञ्चमः ।। 236 ।।

माकन्देति । राजसभायां अल्पज्ञाः केचन असङ्गत प्रसङ्गाडम्बरेण जनान् मोहयन्ति । तन्मध्यस्ती कश्चन पण्डितोत्तमः इदानीमात्मप्रसङ्गस्य समयो नेति तूष्णीं तिष्ठति । तमुद्दिश्य तत् स्नेहितस्य कस्यचित् उक्तिम् अन्यापदेशेनाह । श्लोकार्थः उभयत्राऽपि स्पष्ठः ।

गुरुदारसङ्गकारी स्वभावतस्त्वं कलङ्कवानिन्दो
श्लाघ्यस्तथाऽपि सर्वैः कारणमेतत् कलाधिकत्वन्ते ।। 237 ।।

गुर्वित्यादि । कस्यचन विदुषः आचारलेशोऽपि नास्ति । दुराचारपूर्णत्वमप्यस्ति । तथाऽपि वैदुष्येन सः सर्वश्लाघ्यो भवति । तं प्रत्युक्तिः ।

कृष्णाङ्गता सदृश भावमवाप्य मूढ मातङ्गमेषि कुतुकात् बत कोकिलेन ।
तस्मिन्नुदञ्चयति पञ्चममञ्चितं ज्ञैः किं वा करिष्यसि तदा वद वायस त्वम् ।। 238 ।।

कृष्णेति । पण्डितेन सह कश्चन अज्ञोऽपि वस्त्रादि आडम्बर पूर्वस्सन् राजसभां याति । तमुद्दिश्य कस्यचन उक्तिः । श्लोकार्थः स्पष्टः ।

शाखाञ्चूततरोस्समेत्य च पिकव्रातस्य सङ्कूजतो मध्ये तिष्ठसि वायसाति वपुषं त्वां कोकिलाधीश्वर ।
मत्वा केचन तावकं च निनदं श्रोतुं किलाशासते जोषं भावमुपेत्य गौरवमिदं रक्ष प्रहासोन्यथा ॥ 239 ॥

शाखामिति । राजसभायां पण्डितानां प्रसङ्ग कुर्वतां मध्ये कश्चन अज्ञः बृहत् बपुः वस्त्रादिभूषितो वर्तते । तं महापण्डितं तस्य प्रसङ्गचातुरीं केचन श्रोतुमिच्छन्ति । तमुद्दिश्य कस्यचनोक्तिः ।

यो दाता पयसामपान्निधिरसौ तूष्णीं स आस्ते महान् ।
दास्यामीति पयोभराणि जगते तस्मात्गृहीत्वा बहु ।
सर्ववाचि विनिक्षिपन्नपकृपा भीतिः कणान् पञ्चषा -
त्वन्नो दास्यसिवा न वा भ्र बहुधा किन्ते वृथा गर्जनम् ॥ 240 ॥

य इत्यादि । कश्चन महोदारो महाराजः मन्त्रिमुखेनार्थिभ्यो न धनादिकं ददाति । सचदुष्टो मन्त्रि तत् सर्वं स्वसात्कृत्वा तत्र यत् किञ्चिदंशं अर्थिभ्यो ददन् तान् भर्त्सयति धिक्कुरूते च । तमुद्दिश्य कस्यचनोक्तिः । श्लोकार्थः उभयत्र स्पष्टः ।

यस्मादभ्रात् सुभीतो भजदतिरभसं मानसं राजहंसः
तेन भ्रान्तेन केकां रचयसि बहुधा मानितस्त्वं मयूर ।
तुल्यो हंसेन किंस्या मधुरनिनदता देवतावाहता च स्यात्
आन्तेऽथाति किंस्याद्वद जलपयसोः कौशलन्ते विभागे ॥ 241 ॥

यस्मादिति । कस्याञ्चित् सभायां प्राधान्येत स्थापितः कश्चन सर्वशास्त्रज्ञः पण्डितोत्तमः मूर्खेणारसिकेन सभाध्यक्षेणाधिक्षिप्तः सभान्तरं जगाम । तत् स्थाने अल्पज्ञः कश्चन पण्डितः तेनाध्यक्षेण स्थापितस्सन् स्वपक्षपातिनं तेनारसिकेन श्लाघितः मुहुर्मुहुः अट्टहासं करोति । तमसहमानस्य कस्यचन तं प्रत्युक्तिः ।

मत्तो नास्यगतिस्ततो जलकणा देया विधेयायहे -
त्यल्पं वाप्यविचिन्त्ययात्यकणो मेघस्समोध ध्वनिः ।
त्वं चेच्चातक तं प्रतीक्ष्य बहुधा स्विन्नोतिखिन्नोस्यतः
तस्मात् जीवनतो वरं हि मरणंमन्ये तदन्ये न ते ॥ 242 ॥

मत्त इति । कश्चन याचकः कश्चित् प्रभुं नित्यं अनुवर्तते । स च प्रभुः तस्मिन् निर्दयः तस्मै किञ्चिदपि दातुं बहु विलम्बते । सच याचकः क्लिश्यति । तत् क्लेशम् असहमानस्य * * * * (स स्य) कस्यचित् वैराग्येन याचकं प्रत्युक्तिः ।

विद्युत्सङ्गोऽपि तावत् शिखिनटनमहो चातकप्रार्थनं वा
शालिस्तोमप्रतीक्षा रतिपरमिथुनश्लाघनं तावदेव ।
मेघोमेघोयमित्थं प्रथितिरपि भवान् यावदास्ते ससारः
तस्माच्छैलादिषु त्वं विसृज निजरसं मा घन व्यर्थमेवम् ॥ 243 ॥



विद्युदिति । कश्चन महोदारः पात्रापात्र विवेकमन्तेरण अतिव्ययं करोति । तमुद्दिश्य तत् संज्ञस्य कस्यचन हितोक्तिरियम् । तव हस्ते धनं तावत् एव त्वयि बन्धवः पत्नी पुत्रादयश्च प्रीतिं कुर्वन्ति । याचक जनोऽपि श्लाघते । धनाभावे सर्वाप्युपेक्षामेव कुर्युः । तस्मात् अपात्रे धनं व्ययं अकुर्वन् धनं रक्षेति । उभयत्राप्यर्थः स्पष्टः ।

त्वत्तो मेघ पुराप्तजीवनमुखा ये चातकाद्या जनाः
ते मृत्युं न गता हि सन्ति भुवने सर्वे कृतघ्नायतः ।
दत्त्वा सारमशेषमत्र भवति क्षैण्यं गते कुत्र वा
मेघः किं कुरूते बतेति मनुते नत्वां स्मरन् कश्चन ॥ 244 ॥

त्वत्तइति । सर्वं धनव्रातं अर्थिभ्यो बन्धुभ्यश्च दत्त्वा दरिद्रं कञ्चन * * * * पूर्वं तस्मात् लब्धधनाः सर्वेऽपि कृतघ्नतया उपेक्षन्ते । तमुद्दियोक्तिः ।

निश्चेष्टं कलयन् वपुस्तत इतो पश्यन्न किञ्चिद्वदन्
एकोनीरतटे विशुद्धमुनिवत् ध्यायन् किमास्से बक ।
मत्स्यं कञ्चन कुक्षिपूरणकृते पर्याप्तमालक्ष्ययन्
क्षुद्रान् तान् समुपेक्षसे निकटगान् विस्रम्भहेतोर्ननु ॥ 245 ॥

निश्शेष्ट इति । कश्चन डांबिक वैदिकः धनाशया कञ्चन ग्राम - विशेषं गत्वा तत्र महावैदिकनटनं कुर्वन्नास्ते । तं प्रामाणिकं मत्वा तत्रस्थैः समर्पितं यत् किञ्चित् धनादिकं वैराग्य भावनां कुर्वन् स नाङ्गीकरोति । एवं स्ववैराग्य विश्वस्तेन केनाऽपि स्वस्मिन्नधिक धन्यादि न्यासे सति तत् कबळीकुर्यामिति तदाशयः । तं डांबिकं प्रति * * * * तन्मर्मज्ञस्य * * * * नोक्तिः ।

वायो वह्निस्समस्तं यदि दहति दहत्वाश्रयाशस्य यस्मात्
प्राणापानादिरूपादुपकृतिरधिका त्वत्त एवेह सिद्धा ।
भूत्यै च त्वां यजन्ते जगति तव जगत्प्राण इत्येव संज्ञा
तत् भूत्वाग्नेस्सहायोऽनल वद पयशो भाजनं मास्म भूस्त्वम् ॥ 246 ॥

वायो इति । आजान दुष्टस्य निर्घृणस्य कस्यचन सहवासदोषात् साधुस्वभावः कश्चित् स्वयमपि तत् साहाय्यकरणे न जानन् बधतेयाचते । तमुद्दिश्य तन्मित्रस्य कस्यचन हितवचनमेतत् । मृत्यैसत्यां भजन्त याचन्त इति । वायव्यं श्वेतमालभेत भूतिकाम इति श्रुतेः इति भावः ।

भो केतकी कुसुम ते सुभगच्छगन्धः रूपं सुवर्णसममाकृतिरङ्गहृद्या ।
यत्कण्ठकावरण कल्पनमेष दोषो नो चेत् तवास्ति कुसुमं न समं धरण्याम् ॥ 247 ॥

भो इति । उदारस्वभावः साधुशीलः कश्चित् प्रभुरस्ति । स च अतिदुष्ट - स्वपरिजनोपद्रवात् अर्थिनां सुगमो न भवति । तमद्दिश्योक्तिः ।

गोरोचना मृगमदादिम वस्तुजातं जातं कुतः कुत इदं सकलोपभोग्यम् ।
इत्थं विचिन्तयसि किं रसिका हि सारं गृह्णन्ति तज्जनिभुनं न परामृशन्ति ॥ 248 ॥

गोरोचनेति । किञ्चित् अनभिजातः कश्चित वैदिकत्व प्रामाणिकत्व शास्त्रतत्वादिभ्यनदिष्ट गुणपूर्णस्सन् सर्वैः प्रामाणिकैः पूजितो वर्तते । तत् दुष्ट्वा कश्चन कुलाभिमान मातृमूढः कथं सर्वेप्येनं पूजयन्त इति शंसते । * * * * * * * * * * * * * * * * * * * * ।

निम्बस्य रूक्षपत्रं भक्षयकामं न मेत्यहं वच्मि ।
माकन्दकन्दळं यत् द्वेष्टि भवानुष्ट्र तत् परं मास्तु ॥ 249 ॥

निम्बस्येति । कश्चन अरसिकः निरक्षरकुक्षिं स्वभावतो मूर्खं च कश्चन पुरूषं स्तौति । सर्वशास्त्रज्ञं सकलगुणपूर्णं पण्डितवरं निन्दति । तमुद्दिश्य कस्यचन वचनमेतत् । एवं च श्लोकार्थः स्फष्टः ।

भो भो संशृणु शाल्मलिद्रुम तव त्वच्छाकसंघस्य च
प्रानलयं समवेक्ष्य तत् परिणते कालं प्रतीक्ष्यासते ।
एते कीरगणाः द्रुमान्तरफलं त्यक्त्वाऽपि भूयाशया
तान्श्चेत्त्वं द्रुतमेव पक्व फलको भूत्वा निराशान् कुरू ॥ 250 ॥

भो इति । कश्चन लुब्ध धनिकं तत् स्वभावं अजातमानाः केचनार्थिन तदीय गृहादिसमृद्धिम् अयं महाप्रभुः कालविलम्बेनाऽपि अस्मभ्यं बहु दास्यतीति क्रमेण तमनुवर्तन्ते । सच लुब्धोऽपि शीध्रं नास्तीद्यपि न वदति । तेन अन्यत्रार्जनमपि तद्वार्येण क्लिश्यन्ति । तत् क्लेशम सहमानः कश्चित् तटस्थः तं लुब्धं वदति ।

# विंश प्रकरणम् - सामान्य चाटुश्लोकाः

यस्सूर्यायुतकान्तिरिन्दुवदनो भूषा प्रभालोहितः
सौम्यात्मा गुरूवर्यसेवितपदश्शुक्रैकचक्षुर्हरः ।
शैनेयाधिहरो नृणामहिशयः पक्षीशकेतुर्हरिः
सोऽयं श्रीवसुधादि नित्यपरिषत् संसेवितोऽव्यात् प्रभुः ॥ 251 ॥

य इति । गुरुवर्यैः आचार्य पादैः सेवितपदः । श्रीत्यादिलक्ष्मी प्रभृति महिषी जनेन नित्यसूरिसंसद सेवितः । अस्मिन् श्लोके क्रमेण सूर्यादि नवग्रहोक्तिः इति बोद्धयम् ।

भास्वान् त्वं करुणानिधे विधुरसि श्रीमन् क्षमाभूर्भवान्
सौम्यो देव गुरुर्भवान् दितिभुवां शास्तेति सन्मैत्रकः ।
चक्री त्वं विलसत् ध्वजोसि भगवन् किं वच्मि ते चातुरीं
इत्थं त्वेप्यनवग्रहात्मकतया यत् भासि तद्यद्भुतम् ॥ 252 ॥



भास्वानिति । कान्तिमान् । क्षमायाः - क्षान्तेः भूः वासस्थानं अत एव सौम्यः शान्त इत्यर्थः । देवगरुः - देवश्रेष्ठः यद्वा वेद - तदर्थ प्रदानेन आचार्यः । दितिभुवां शास्ता निगृहीता । सत् निर्हेतुकं मैत्रं - मित्रभावो यस्य सः । चुकी - सुदर्शनवान् । ग्रह परत्वे तु क्षमा भूः अङ्गारकः दितीत्यादि दैत्यानां शास्ता आज्ञापकः शुक्र इत्यर्थः । मित्रस्यापत्यं (सौरिः) * * * * । राहुरित्यर्थः । ध्वजशब्देन लक्ष्णतया केतुरूच्यते । इत्थं नवग्रहात्मक इत्याश्चर्यं इत्यर्थः । अनवग्रहात्मकत्वम् - अप्रति * * * * स्वभावत्वम् इति तात्पर्यम् ।

संराड्शुचिस्त्वं समवर्ति पुण्यजन प्रचेता असि चक्रपाणे ।
चित्रं जगत्प्राणकुबेर सर्वज्ञोप्येवमास्से यदनष्टमूर्तिः ॥ 253 ॥

संराड् इति । संराट् - स्वतन्त्रः । शुचिः परिशुद्धः हेयप्रत्यनीक इत्यर्थः । समवर्तिनः - निष्पक्षपाता ये पुण्यजनाः - साधवः तेषु प्रकृष्टं सदयमित्यर्थः चेतः यस्य सः । जगत्प्राण - जगत्प्राण भूत सर्वान्तर्यामी इत्यर्थः । कुबेरे - पृथिवी शरीरक । सर्वज्ञश्च आस्से । दिक्पालपरत्वे तु संराट् - इन्द्रः । शुचिः अग्निः । समवर्ती यमः । पुण्यजन शब्देन नैऋतिं उच्यते । (यातुधानः पुण्यजनो नैऋतो यातु रक्षसी - अमरः) । प्रचेताः - वरूणः । जगत्प्राणः वायुः । सर्वज्ञः ईशानः । इत्थं दिक्पालाष्टमूर्तित्वेऽपि - अनष्टमूर्तित्वम् - आश्चर्यम् इत्यर्थ । अनर्था- स्थिराः यस्य सः इति भावः ।

नाथ त्वं हि विरोधि सर्वजिदसि क्रोधिस्वरूपोसतां
शिष्टानाञ्च रमानिवास शुभकृत् सौम्योऽसि साधारणः ।
संसृत्यब्धिजुषां प्लवेश्वर भवानुक्तोक्षयानन्दको -
प्येवं चेदसमात्मतां भजसि यत् स्वामिन् तदत्यद्भुतम् ॥ 254 ॥

नाथेति । विरोधिनः सर्वान् जेत्तीति विरोधिसर्वजित् । असतां क्रोधिस्वरूपः कोपवानित्यर्थः । साधारणः - सुलभ इत्यर्थः । प्लव - उत्तारक इत्यर्थः। भवान् अक्षयानन्दकः नित्यानन्द इति श्रुत्युक्तः । इत्थं समात्मतां - वर्षात्मत्वं (संवत्सरो वत्सरोऽब्दो हायनोऽस्त्री शरत्समाः - अमरः)भजन् अपि, असमात्मतां - तदभावं भजसीति यत् तदाश्चर्यम् इत्यर्थः । असमात्मतां-निस्समात्मत्वम् इति भावः ।

षष्ठी वक्षसि यस्य भाति स वपुर्भागे द्वितीय ध्वजः
पुत्रस्यात् दशमध्वजोऽपि नवमं हस्ते च शाङ्गाभिधम् ।
यो वा द्वादशतुल्यनेत्रयुगळः स्यात् पञ्चमो विक्रमे
सप्तं या रहितश्च सोयमधुना कुर्यात् शुभं केशवः ॥ 255 ॥

षष्ठीति । राशिगण इत्यर्थः । (षष्ठी) कन्या लक्ष्मीत्यर्थः । द्वितीयध्वजः - वृषभध्वजः रूद्रः इत्यर्थः यस्य पार्श्वं भगवत् देहपार्श्वस्थले रूद्राधिष्ठानं बोध्यम् । दशमध्वजः (मकरध्वजः) मन्मथः । शिष्टं स्फष्टम् । (नवमं-धनुः । द्वादशतुल्य-मीन सदृश । पञ्चमः - सिंहः । सप्तं तुला - तुलारहितः असमानः)

